# svapnoditam

# સ્વપ્નોદિતમ્

## Document Information

Text title : svapnoditam

File name : svapnoditam.itx

Category : major_works, sadAshivabrahmendra

Location : doc_z_misc_major_works

Author : Sadashivendra Sarasvati

Proofread by : Sunder Hattangadi

Latest update : December 2, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# સ્વપ્નોદિતમ્

દેશિકાનુગ્રહોત્તુઙ્ગતરઙ્ગશિશિરાશયઃ ।
નિવસામિ નિજાનન્દપરિપૂર્ણૈકભૂમનિ ॥ ૧॥

દેશિકાનુગ્રહોત્તુઙ્ગમત્તમાતઙ્ગમસ્તકમ્ ।
આરુહ્ય વિહરામ્યાત્મપદે સમરસોજ્જ્વલે ॥ ૨॥

દેશિકાનુગ્રહોત્તઙ્ગગિરિશ‌ૃઙ્ગમુપેયુષઃ ।
તૃણવદ્ભાતિ મે સર્વં જગદત્યલ્પમાતતમ્ ॥ ૩॥

દેશિકાનુગ્રહોદારગ્રહગ્રસ્તાત્મવાનહમ્ ।
ન કિઞ્ચિદપિ જાનામિ જગદેતચ્ચરાચરમ્ ॥ ૪॥

દેશિકાનુગ્રહોદારવેત્રોદસ્તમનોગ્રહઃ ।
વિજાનામિ જગત્સર્વમાત્મમાત્રતયાધુના ॥ ૫॥

દેશિકાનુગ્રહોદારતરણિપ્રસરોદ્ભવે ।
સ્વાનન્દૈકરતં વીક્ષે સમુલ્લસિતમદ્ભુતમ્ ॥ ૬॥

દેશિકાનુગ્રહોદારતુષારકિરણોદયે ।
આશ્ચર્યમાન્તરામ્ભોજમુન્નિદ્રમભવન્મમ ॥ ૭॥

દેશિકાનુગ્રહોદારદાવાનલલતા ભૃશમ્ ।
દગ્ધ્વાશેષં જગજ્જાલમલં માં શીતયત્યહો ॥ ૮॥

દેશિકાનુગ્રહોદારરવિતપ્તમનોમરૌ ।
સ્વાનન્દકન્દલઃ કશ્ચિદાશ્ચર્યમુદભૂદ્ભૃશમ્ ॥ ૯॥

દેશિકાનુગ્રહોદારસમીરે વાતિ સર્વતઃ ।
મમ ચિત્તમહામ્ભોધિશ્ચિત્રં ન સ્પન્દતે કુતઃ ॥ ૧૦॥

દેશિકાનુગ્રહોદારદારૈઃ સન્તતસઙ્ગિનઃ ।
મમ ભાવે મનો લીનં નિવૃત્તાશેષવૃત્તિકમ્ ॥ ૧૧॥

દેશિકાનુગ્રહોદારપીતામ્બરધરસ્ય મે ।
શીતતાપાદિભિર્દુઃખં કથં સઙ્ઘીભવિષ્યતિ ॥ ૧૨॥

દેશિકાનુગ્રહોદારસામ્રાજ્યાધિપતેર્મમ ।
અશેષમભવદ્વશ્યમતઃ કિમવિશેષતઃ ॥ ૧૩॥

દેશિકેન્દ્રકૃપાખડ્ગખણ્ડિતાશારિમણ્ડલઃ ।
અખણ્ડિતનિજાનન્દમણ્ડલે નિવસામ્યહમ્ ॥ ૧૪॥

દેશિકેન્દ્રકૃપાખડ્ગકૃત્તચિત્તમૃગોત્તમઃ ।
શાન્તભીતિશ્ચરામ્યન્તરાત્મકાન્તારસન્તતૌ- ॥ ૧૫॥

દેશિકેન્દ્રકૃપાખડ્ગવિલૂનેઽજ્ઞાનપાદપે ।
સંસારઘોરવેતાલઃ ક્વ ગતો વા ન વેદ્મ્યહમ્ ॥ ૧૬॥

દેશિકેન્દ્રકૃપાચન્દ્રચન્દ્રિકાશીતલાકૃતિઃ ।
સંસારસૌરસન્તાપં' નૈવાહં વેદ્મિ કિઞ્ચન ॥ ૧૭॥

દેશિકેન્દ્રકૃપાચન્દ્રસમેધિતચિદમ્બુધૌ ।
નિમગ્નોઽહં ન પશ્યામિ સ્વભિન્નં વસ્તુ કિઞ્ચન ॥ ૧૮॥

દેશિકેન્દ્રકૃપાચન્દ્રનિરસ્તાન્તસ્તમસ્તતિઃ ।
કિમપ્યહં ન પશ્યામિ કિમાશ્ચર્યમભૂદિહ ॥ ૧૯॥

દેશિકેન્દ્રકૃપાચન્દ્રપ્રફુલ્લાનન્દકૈરવમ્ ।
આઘ્રાયાઘ્રાય હૃષ્યામિ સ્વાત્મન્યેવ મુહુર્મુહુઃ ॥ ૨૦॥

દેશિકેન્દ્રકૃપાચન્દ્રદ્રુતચન્દ્રોપલાન્તરઃ ।
વિશ્રાન્તિમાપ્તવાનસ્મિ વિજ્ઞાનૈકરસે પદે ॥ ૨૧॥

કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ દેશિકાનુગ્રહાદહમ્ ।
અતઃ સર્વે જનો યૂયમુપાદ્ધ્વં દેશિકોત્તમમ્ ॥ ૨૨॥

ઇતિ સ્વપ્રોદિતાં નિષ્ઠામનુસ્મરતિ યઃ પુમાન્ ।
સોઽસૌ સત્યપરાનન્દપદવીં યાતિ પાવનીમ્ ॥ ૨૩॥

ઇતિ શ્રીસદાશિવેન્દ્રસરસ્વત્યા વિરચિતં સ્વપ્રોદિતં સમ્પૂર્ણમ્ ।

॥ હરિઃ ૐ ॥

Proofread by Sunder Hattangadi

*svapnoditam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*